Kalap Datt

165

ॐ

श्रीगणेशाय नमः

दयौदार्यादिगुणालंकृतश्रीमन्महा
राजाधिराजरणवीरसिंहानुकम्पया

कलापवृत्तकं सन्धिप्रकरणम्

मतिप्रवीणरायबहादुररघुवरायस्योद्य
मेनश्रीनगरान्तर्यन्त्रालयेयन्त्रितम्

संवत् १९३२

CC-0. In Public Domain. Digitized by eGangotri

6196.
Price Rs. /4/-
165
891.245
R19K.
6196

CC-0. In Public Domain. Digitized by eGangotri

PRATAP SINGH MU[SEUM]
Cl. No. 493
SRINAGAR

ॐ

श्रीगणेशाय नमः ॥

गं श्रीमद्बालात्रिपुरसुन्दर्यै नमः ॐ सिद्धो वर्णसमाम्ना
यः वर्णानां अकारादीनां यः समाम्नायः क्रमेणपाठः सिद्धः
प्रसिद्धः लोके इति किं तेन उपदिष्टेन आविद्वदङ्गनागोपाल
बालपर्यन्तं यावत् वर्णाः ५२ अआइई उऊऋॠ ऌॡए
ऐ ओऔअंअः कखगघङ चछजझञ टठडढण तथदध
न पफबभम यरलव शषसह वर्णसंज्ञया का प्रयोज
नम् सर्वत्र ॥ तत्र चतुर्दशादौ स्वराः ॥ तत्रप्रसिद्धे वर्णसमा
म्नाये आदौ ये चतुर्दश वर्णास्ते स्वरसंज्ञा भवन्ति स्वराः
१४ अआइई उऊऋॠ ऌॡएऐ ओऔ स्वरसंज्ञया का प्र।
योजनं यो देलोपं स्वरस्सवर्णे दीर्घ इत्यादिषु ॥ दश समा।
नाः ॥ तत्र प्रसिद्धे वर्णसमाम्नाये आदौ ये दश वर्णास्ते

CC-0. In Public Domain. Digitized by eGangotri

समानसंज्ञा भवति समानाः १० अआइईउऊऋॠऌॡ
समानसंज्ञया क्व प्रयोजनम् समानः सवर्णे दीर्घीभव
ति परश्च लोपम् इत्यादिषु" तेषां द्वौ द्वौ वर्णावन्योन्यस्य सव
र्णौ" तेषां दशानां समानानां मध्यात् यौ द्वौ द्वौ वर्णौ
तौ वर्णावन्योन्यस्य परस्परं सवर्णसंज्ञौ भवतः सवर्णाः १०
अआइईउऊऋॠऌॡ कस्य कस्य सवर्णाः अकारस्य
आकारः सवर्णः आकारस्य अकारः सवर्णः इकारस्य
ईकारः सवर्णः ईकारस्य इकारः सवर्णः उकारस्य ऊका
रः सवर्णः ऊकारस्य उकारः सवर्णः ऋकारस्य ॠकारः
सवर्णः ॠकारस्य ऋकारः सवर्णः ऌकारस्य ॡकारः
सवर्णः ॡकारस्य ऌकारः सवर्णः सवर्णसंज्ञया क्व
प्रयोजनं समानः सवर्णे दीर्घीभवति इत्यादिषु" पूर्वो
ह्रस्वः" तयोः द्वयोः द्वयोः सवर्णयोः यः यः पूर्वः सः ह्र
स्वसंज्ञो भवति ह्रस्वाः ५ अइउऋऌ ह्रस्वसंज्ञया क्व ।
प्रयोजनम् ह्रस्वोम्बार्थानामित्यादिषु पूर्वस्य लघुसं
ज्ञापि वक्तव्या लघवः ५ अइउऋऌ लघुसंज्ञया क्व प्र
योजनम् नामिनश्चोपधाया लघोः इत्यादिषु" परो दीर्घः"
तयोः द्वयोः द्वयोः सवर्णयोः यः यः परः स दीर्घसंज्ञो
भवति दीर्घाः ५ आईऊॠॡ दीर्घसंज्ञया क्व प्रयोजन
म् दीर्घमामि सनावित्यादिषु परस्य गुरुसंज्ञापि वक्त
व्या गुरवः ५ आईऊॠॡ गुरुसंज्ञया क्व प्रयोजनम् गु
रोश्च निष्ठा योः सेट् इत्यादिषु स्वरोवर्णोवर्जो नामी अव
र्णः अकारआकारौ तौ वर्जयित्वा शिष्टाः स्वराः नामि

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

शिरस्कंपिथन

केप्

अर्थात् टोपी बढाओ

CC-0. In Public Domain. Digitized by eGangotri

नसंज्ञा भवंति नामिनः १२ इईउऊऋॠऌॡएऐओऔ
नामिसंज्ञया क्व प्रयोजनम् नामिनः स्वरे इत्यादिषु ए
कारादीनि सन्ध्यक्षराणि एकारादीनि वर्णानि संध्यक्षर
संज्ञानि भवंति संध्यक्षराणि ४ एऐओऔ सन्ध्यक्षरसंज्ञ
या क्व प्रयोजनम् सन्ध्यक्षराणां नामाकारो विकरणे इ
त्यादिषु कादीनि व्यञ्जनानि ककारादीनि वर्णानि व्यञ्ज
नसंज्ञानि भवंति व्यंजनानि ३३ कखगघङ चछजझ
ञ टठडढण तथदधन पफबभम यरलव शषसहा
व्यंजनसंज्ञाया क्व प्रयोजनम् मोनुस्वारं व्यञ्जने इत्यादिषु
* ते वर्गाः पंचपंचशः ते कादयो वर्णाः पञ्चशः पञ्च प
ञ्चाक्षराणि भूत्वा पञ्चवर्गा उच्यन्ते वर्गाः ५ कचटतप
वर्गाः २५ कवर्गः कखगघङ चवर्गः चछजझञ टव
र्गः टठडढण तवर्गः तथदधन पवर्गः पफबभम वर्ग
संज्ञया क्व प्रयोजनम् वर्गे वर्गेण इत्यादिषु * वर्गाणां
प्रथमद्वितीयाः शषसाश्चाघोषाः * वर्गाणां ये प्रथमद्वि
तीयाः वर्णाः तथा शषसाश्च ते अघोषसंज्ञा भवंति अघो
षाः १३ कख चछ टठ तथ पफ शषस अघोषसंज्ञया क्व
प्रयोजनम् अघोषे प्रथमा इत्यादिषु घोषवंतोन्ये * अघो
षेभ्यः ये अन्ये वर्णाः ते घोषवत्संज्ञा भवन्ति घोषवन्तः २
गघङ जझञ डढण दधन बभम यरलवह घोषवत्सं
ज्ञया क्व प्रयोजनम् अकारो दीर्घं घोषवति इत्यादिषु * अ
नुनासिका ङञणनमाः * ङञणनमाः वर्णाः अनुनासि
कसंज्ञया क्व प्रयोजनम् अतोन्त्यात्स्वादनुनासिकान्तस्य

CC-0. In Public Domain. Digitized by eGangotri

इत्यादिषु + अन्तस्था यरलवाः + यरलवाः वर्णाः अन्त
स्थसंज्ञा भवन्ति अन्तस्थाः च यरलवा अन्तस्थसंज्ञया
क्व प्रयोजनम् सपरस्वरायाः सम्प्रसारणमन्तस्थाया
मित्यादिषु + ऊष्माणः शषसहाः + शषसहवर्णाः
ऊष्मसंज्ञा भवति ऊष्माणः च शषसह ऊष्मसंज्ञया
क्व प्रयोजनम् नास्य पार्थक्येन योगारम्भ इत्याहुः
+ अः इति विसर्जनीयः अकारात् परं बिन्दुद्वयं विसर्जनी
यसंज्ञं भवति विसर्जनीयः कीदृशः स्तनवद्बालवत्सा
स्य बालिकाकुचयुग्मवत् नेत्रवत्तस्य सर्पस्य विसर्गः
परिकीर्तितः विसर्जनीयसंज्ञया क्व प्रयोजनम् विस
र्जनीयस्य सेऽच्याक्षामित्यादिषु + ᳵक इति जिह्वामूलीयः
+ ककारात्पूर्वो वर्णः जिह्वामूलीयसंज्ञो भवति जि
ह्वामूलीयः कीदृशः यवाकृतिवर्णः जिह्वामूलीयसंज्ञया
क्व प्रयोजनम् कखयोः जिह्वामूलीयेन वा इत्यादिषु +
ᳵप इत्युपध्मानीयः पकारात्पूर्वो वर्णः उपध्मानीयसंज्ञो भ
वति उपध्मानीयः कीदृशः हस्तिकवाटसदृशः उपध्मा
नीयसंज्ञया क्व प्रयोजनम् पफयोरुपध्मानीयेन वेत्या
दिषु + अं इत्यनुस्वारः + अं इत्यत्र यो बिन्दुः सोऽनुस्वारसं
ज्ञो भवति अनुस्वारसंज्ञया क्व प्रयोजनम् मोऽनुस्वारो व्यं
जने इत्यादिषु + पूर्वपरयोरर्थोपलब्धौ पदम् + पूर्वस्य लि
ङ्गस्य परस्य च स्यादेः तथा पूर्वस्य धातोः परस्य च त्यादेः
यः समुदायः एकीभावः स पदसंज्ञो भवति अर्थोपल
ब्धौ सत्यां पदसंज्ञया क्व प्रयोजनम् नुम्नादस्सन्तः पदे

पदान्सप्तमीचतुर्थी द्वितीया सुवसौ इत्यादिषु + अ
नतिक्रमय न्विषेधयेत् वर्णानामेकत्र युक्तानां अति
क्रमं विपर्ययमकुर्वन्विक्षेपं कुर्यात् येनैवक्रमेण व
र्णाविन्यस्ता तेनैवक्रमेणवर्णाः संयुज्यन्ते इतिपरि
भाष्यते अनियमे नियमः परिभाषा + व्यञ्जनम
स्वरं परं वर्णं नयेत् अस्वरं स्वररहितं यत् व्यञ्जनं
तत्परं वर्णं नयेत् प्रापयेत् व्यञ्जनस्वरयोश्च संयोग
सिद्ध्यर्थं वचनम् त्वमत्र सत्कर्म अहमिह + लोको
पचाराद्ग्रहणसिद्धिः लोकोपचारात् पूर्वाचार्यशास्त्रा
दनुक्तस्य ग्रहणस्य शास्त्रस्य परिभाषादेः सिद्धिर्नि
ष्पत्तिर्भवति लक्ष्योपलक्षणादय इत्यादयो लोकात्तेश्च
त्पशास्त्रादेव मारणीयाः इति लघुहेतो

सन्धिप्रकरणे संज्ञापादः प्रथमः

ॐ समानः सवर्णे दीर्घी भवति परश्च लोपम् समानो
वर्णः सवर्णे परे दीर्घो भवति परश्च लोपमापद्य
ते माषाढकम् दधीदं ते मधूदकं होतृषिः गम्लृ।
कारः + सनिचानिटीतिज्ञापकात् + द्वयोः ह्रस्वयोः
दीर्घपरलोपोवक्तव्यौ कस्मात् दण्डाग्रम् दधीदं मधू
दकं तृतीयादौ तत्पदादिः इतिज्ञापकात् द्वयोर्दीर्घयोः
दीर्घपरलोपौवक्तव्यौ सक्तायतनम् मालायतनं गौ
रीश्वरः + समानग्रहणमितिविद्यमानात् + द्वयोः ह्रस्वदी
र्घयोर्दीर्घपरलोपौवक्तव्यौ गंगात्र कुमारीयं वधूतः
+ आवर्णे इवर्णेच + अवर्णः अकार आकारो इव

CC-0. In Public Domain. Digitized by eGangotri

र्णे इकारे ईकारेच परे एकारोभवति परस्य लोपमाप
द्यते नवेदं सेयम् उमेद्गते + उवर्णेओ + अवर्णः अ
कार आकारौ उवर्णे उकारे ऊकारेच परे ओकारोभ
वति परस्य लोपः नवोदकम् गङ्गोदकम् उमोद
ते + ऋवर्णेअर् अवर्णः अकार आकारौ ऋवर्णे ऋ
कारे ऋकारेच परे अर् भवति परस्य लोपः नवर्णः म
हर्षिः नवकारः + लृवर्णे अल् + अवर्णः अकार आ
कारौ लृवर्णे लृकारे लॄकारेचपरे अल्भवति परलो
प्श्च नवल्कारः खट्वल्कारः + एकारेऐकारेच + अव
र्णः अकार आकारौ एकारे ऐकारेच परे ऐकारोभव
ति परलोपश्च नवैडका खट्वैतिकायनं उमैषा + औ
कारे ओऔकारेच अवर्णः अकार आकारौ ओकारे औका
रेचपरे औकारोभवति परलोपश्च नवौदनः खट्वौपगव
+ इवर्णोयमसवर्णेनचपरलोपः इवर्णः इकार ईका
रौ असवर्णे स्वरे परे यत्वमापद्यते परलोपोन भवति
दध्यत्र नद्येषा + वमुवर्णः + उवर्णः उकार ऊका
रा असवर्णे स्वरे परे वत्वमा पद्यते परलोपोनभव
ति मध्वत्र वध्वासौ + रमृवर्णः + ऋवर्णः ऋकार
ॠकारौ रत्वमापद्यते असवर्णे स्वरे परे परस्य लोपो
नभवति + पित्रर्थः मात्रर्थः राकृतिः + रम्लृवर्णः +
लृवर्णः लृकार लॄकारौ लत्वमापद्यते असवर्णे स्व
रे परे परस्यलोपोन भवति लनुबन्धः लाकृतिः + एअ
य् + एकारः अय् भवति स्वरे परे अग्नयः वायवः ॥

CC-0. In Public Domain. Digitized by eGangotri

ऐ आय् ऐकारः आय् भवति स्वरे परे रायौ रायः + ओ
अव् + ओकारः अव् भवति स्वरे परे धेनवः पटवः +
औ आव् + औकारः आव् भवति स्वरे परे ताविह ता
विह अयादीनां यवलोपः पदान्ते नवा लोपेतु प्रकृ
तिः + अय् आय् अव् आव् एते अयादयः एषाम्।
यादीनां पदान्ते स्थितानां यो यकार वकारौ तयोर्लो
पो भवति नवा विकल्पेन लोपेतु कृते प्रकृतिः यथास्व
रूपं भवति पुनः सन्धिकार्यं प्राप्तेन भवतीत्यर्थः क
आसते वा कयासते कस्माइदं वा कस्मायिदं इन्द इ
ति वा इन्दविति असाउहवा असाविह + एदोत्परः प
दान्ते लोपमकारः + पदान्ते वर्तमानौ यौ एदोतौ
ताभ्यांपरः अकारः लोपं प्राप्नोति अग्नेऽत्र वायोऽत्र +
नव्यञ्जने स्वराः सन्धेयाः + व्यञ्जने परे स्वराः सन्धे
याः सन्धानयोग्याः न भवन्ति दण्डहस्तः दधिशीतम्
मधुमाजनम् गौरीगृहं वधूमुखम् मातृमण्डले

इति लक्ष्मीसन्धिप्रकरणोत्सर्गा नपादो द्वितीयः २ ॥

ओं ओदन्ता अ इ उ आ निपाताः स्वरे प्रकृत्याः + ओदन्ता
ओकारान्ताः ये निपाता तथा अ इ उ आ एते स्वरेपरे प्र
कृत्या यथास्वरूपं भवति सन्धिकृतां विकृतिं नाप
यन्ते नो अत्र अहो आश्चर्यं अ अपेहि इ इन्द्रं पश्य उ उ
त्तिष्ठ आ एवं नु मन्यसे आ एवं नु किं लनत् + द्विवचा
मैनो + अनौ ओकाररहितं द्विवचनं प्रकृत्या भवति ॥

CC-0. In Public Domain. Digitized by eGangotri

ल्लोपे अमीअत्र वाहूह घालेऽत्र मालेऽत्रानय प
चेतेऽह अनादितिकिं हलावत्र बहुवचनममी + अ
मीइति यद्बहुवचनम् तत्स्वरेपरे प्रकृत्याभवति अ
मीअश्वाः अमीआदित्याः बहुवचने इतिकिम् अमु
त्र + अनुपदिष्टाश्च + इहयाह्ये ये अनुपदिष्टाः अ
नुक्ताः ल्लोपस्तुतादयः ते स्वरे परे प्रकृत्याभवे
ति देवदत्ता ३ इह यज्ञदत्ता ३ उतिष्ठ + एकमात्रोऽ
वेह्रस्वोद्विमात्रोदीर्घउच्यते त्रिमात्रस्तुप्लुतोज्ञेयो व्य
ञ्जनंत्वर्धमात्रकम् चाषोवदत्येकमात्र द्विमात्रंवाय
सोब्रवीत् त्रिमात्रस्तुशिखीब्रूया न्नकुलश्चार्धमात्र
कम् इतिलघुकौमुद्यांसन्धिप्रकरणे

ऽथमपादस्समाप्तः १

नेवर्गप्रथमाः पदान्ताः स्वरेघोषवत्सु तृतीयान्
वर्गाणांये प्रथमाः कचटतपाः पदान्ताः पदस्यान्तभू
ताः ते स्ववर्गास्त्याः सन्ते तृतीयान्ना पद्यन्ते स्वरेप्र
परेघ घोषवत्सुच वागत्र अजिद घडानय नदिद
तिष्ठतियम् वाग्गतिः षड्जातिः षड्कुरगाभि नेज
मनम् त्रिष्टुब्गायत्री + पञ्चमे पञ्चमा तृतीया
न्वा + वर्गप्रथमाः पदान्ताः पञ्चमे परे स्ववर्ग
स्त्यासन्तेः पञ्चमान्ना पद्यन्ते तृतीयान्वा वाङ्मध
ना वा वाग्मधुरा अम्माद्वेवा अन्नात्रम् षण्नयनेन वा
षड्नयने तन्मीतिः वा तद्नीतिः त्रिष्टुम्भिनोति वा त्रि
ष्टुब्भिनोति + वर्गप्रथमेभ्यः शकारः छमय ॥

CC-0. In Public Domain. Digitized by eGangotri

लपर ऌकारेणवा + वर्गप्रथमेभ्यः पदान्तेभ्यः
परः शकारः स्वरपरः यमपरः वपरः रेफपरश्च
छकारं आपद्यते नवा विकल्पेन वाक्छूरः वा
वाक्शूरः अच्छ्यामा वा तच्छ्यामा वक्श्यामा वा
वक्श्यामा तच्छ्लोकेनवा तच्श्लोकेनम् त्रिष्टुप्छ्रयतेवा।
त्रिष्टुप्श्रूयते + तेभ्यएव हकारः पूर्वसवर्णंनवा
तेभ्यः पदान्तेभ्यः वर्गप्रथमेभ्यः परः हकारः पू
र्वस्य वर्गस्य चतुर्थंवर्णमापद्यते नवा वि
कल्पेन वाग्घीनः वा वाग्हीनः अज्झलानिवा अ
ज्हलानि षड्ढलानिवा षड्हलानि तद्धितेवा तद्हिते
त्रिष्टुब्भतेवा त्रिष्टुब्हतम् + परसवर्णं नकारोल
चटवर्गेषु + नकारः पदान्तः लकारे चवर्गे ट
वर्गेच परे परसवर्णमापद्यते तल्लुनाति तच्चिनो
ति तच्छादयति तज्जयति तज्झषति तञ्ञकारः
तड्डीयते तड्ढकारः उड्डीनः उड्ढौकते तण्णकारः
+ चेशो + नकारः पदान्तः ञत्वमापद्यते शे वा।
कारे तच्छ्लोके तच्श्लमश्नानम् ङणना ह्रस्वोपधाः
स्वरे द्विः + ङणनान्ह्रस्वोपधाः स्वरे परे द्विर्भव
न्ति उदङ्ङत्र सुगण्णास्ते पचन्निह + नोन्तश्चछयो
श्शकारमनुस्वारपूर्वम् + नकारः पदान्तः च
छयोः परयोः अनुस्वारपूर्वं शकारमापद्यते स
चपरिनयनाभावात्पूर्वस्यवर्णस्योपरिलिख्यते
भवांश्छिनोति भवांश्छादयति टठयोः षकारम्

CC-0. In Public Domain. Digitized by eGangotri

नकारः पदान्तः टठयोः परयोः अनुस्वारपूर्वं षका
रमापद्यते भवांष्टीकते भवांष्ठक्कुरः + तथयोस्स।
कारं + नकारः पदान्तः तथयोः परयोः अनुस्वारपू
र्वं सकारमापद्यते भवांस्तनोति भवांस्थुडति +
लेलम् + नकारः पदान्तः ले लकारे परे अनुस्वार
पूर्वं लकारमापद्यते भवांल्लुनाति भवांल्लिखति +
जझञशकारेषुञकारम् + नकारः पदान्तः जकारे
झकारे ञकारे शकारेच परे ञकारमापद्यते भवा
ञ्जयति भवाञ्झषति भवाञ्ञकारः भवाञ्शेते +
शिच्छं वा + नकारः पदान्तः शि शिकारे परे च्छं वा
आपद्यते महाञ्छूरः महाञ्च्छूरः महाञ्शूरः +
डढणपरस्तु णकारम् + नकारः पदान्तः + ड
कारे ढकारे णकारेच परे णकारमापद्यते महाण्डी
नः महाण्ढौकते महाण्णकारः + मोनुस्वारं व्यञ्ज
ने + मकारः पदान्तः व्यञ्जने परे अनुस्वारमाप
द्यते त्वंहससि त्वंरमसे + वर्गे तद्वर्गपञ्चमं वा +
मकारः पदान्तः वर्गे परे तस्य वर्गस्य यो वर्गः तस्य
ञ्चमं वा आपद्यते त्वङ्करोषि वा त्वंकरोषि त्वञ्चर
सि वा त्वंचरसि त्वण्टीकसे वा त्वंटीकसे त्वन्तरसि वा
त्वंतरसि त्वम्पासि वा त्वंपासि

इति लघुहैमा सन्धिप्रकरणे वर्णपा दः चतुर्थः ४

ओं विसर्जनीयश्छे छे वा शं + विसर्जनीयः पदान्तः

6196.

CC-0. In Public Domain. Digitized by eGangotri

चकारे छकारे परे शकारमापद्यते कश्चरति कश्छा
दयति + टठेवाषम् + विसर्जनीयः पदान्तः टेवा ठे
वा परे षकारमापद्यते कष्टीकते कष्ठकारः + ते
थेवासम् + विसर्जनीयः पदान्तः तेवा थेवापरे स
कारमापद्यते कस्तनोति कस्थुडति + कखयोर्जि
ह्वामूलीयंनवा + विसर्जनीयः पदान्तः कखयोः
परयोः जिह्वामूलीयमापद्यते नवा विकल्पेन
कᳵकरोति वा कःकरोति कᳵखनतिवा कःखनति
+ पफयोरुपध्मानीयंनवा + विसर्जनीयः पदा
न्तः पफयोः परयोः उपध्मानीयं आपद्यते नवा वि
कल्पेन कᳶपातिवा कःपाति कᳶफलतिवा कःफल
ति + शषसेवावापररूपम् विसर्जनीयः पदान्तः
शेवा षेवा सेवा परे पररूपमापद्यते नवा विक
ल्पेन कश्शेतेवा कःशेते कष्षष्ठःवा कःषष्ठः
कस्साधुर्वा कःसाधुः + उमकारयोर्मध्ये + इ
योः अकारयो र्मध्ये यः विसर्जनीयः सउत्वं प्राप्नोति
कोर्थः सोत्र + अघोषवतोश्च + अकारयोघव
तोर्मध्ये यो विसर्जनीयः सचउत्वंप्राप्नोति कोगतः
योधावति + अपरोलोप्योन्य स्वरेयंवा + अकारात्परः
विसर्जनीयः लोप्यो भवति यत्वं चापद्यते अन्यस्मि
न्नकारादौ स्वरे परे क आह्वा कयाह स इह्वा सयि
ह रुइ उपरिवा रुद्रुपरि + आभोभ्या मेव मेव
स्वरे + आकारभोभगोभ्यां परः विसर्जनीयः लो

CC-0. In Public Domain. Digitized by eGangotri

पंप्राप्नोति यत्वंचापद्यते एवमेवसर्वस्मिन् स्वरेपरे
देवाआहुर्वा देवायाहुः भोऽदेवा भोयिदं + घोष
वतिलोपम् + आकारभोभगोभ्यां परः विसर्जनी
यः लोपंप्राप्नोति घोषवतिपरे देवायान्ति भोयज
+ नामिपरोरम् + नामिनः परः विसर्जनीयः
रत्वंप्राप्नोति स्वपीः स्वतूः + घोषवत्स्वरपरः ना
मिनः परः विसर्जनीयः रत्वं प्राप्नोति घोषवत्स्वर
परयोः अग्निर्गतः अग्निरत्र पटुर्गतः पटुरत्र + र
प्रकृतिरनामिपरोऽपि + रप्रकृतिः रेफप्रकृतिः रे
फस्य स्थानेयः विसर्जनीयः विदितः सञ्नामिपरो
ऽपि रत्वं प्राप्नोति घोषवत्स्वरपरयोः अन्तर्गतः अ
न्तरत्र प्रातर्गतः प्रातरत्र स्वर्गतः स्वरत्र पुनर्गतः
पुनरत्र पुनर्गतः पुनरत्र + एषसपरोलोपोव्यञ्जने
+ एषसपाभ्यां परःविसर्जनीयः लोपोभवति
व्यञ्जनेपरे एषचरति सचरति एषददाति सददा
ति + नविसर्जनीयलोपेपुनःसन्धिः + विसर्जनीय
स्य लोपेकृतेसति पुनःसन्धिकार्यंप्राप्तंनभवति
यथाः कआह सआह + रोरेलोपःस्वरश्चपूर्वो
दीर्घः + रःरेफः रेफेपरेलोपंप्राप्नोति पूर्वश्चदीर्घः
सम्पद्यते अग्नीरथति इन्दूरमते + द्विर्भावंस्वरपर
श्छकारः + स्वरात्परः छकारः द्विर्भावंप्राप्नोति ।
पलाच्छाया देवच्छत्रम् इतिलघुबोधे
[illegible]प्रकारोविसर्जनीयपादःपञ्चमः

CC-0. In Public Domain. Digitized by eGangotri

चवाहाहैवमोहंहो उताहो हो अहो अथो निपातोऽव्ययम्
च वा ह अह एव नो हं हो उताहो हो अहो अथो एषामे
कादशानां चादीनां शब्दानां एकैको निपातसंज्ञो भवति
अव्ययसंज्ञाश्च प्रयोजनं च उदन्ता अउ आ निपाताः
स्वरे प्रकृत्या अव्ययात्सेस्त्यादिषु + अन्तः स्वः प्रातः पु
नःप्रोच्चैः + अन्तरादयः षट् अव्ययसंज्ञा भवन्ति।
अपिशब्दः समुच्चयार्थः अन्तः स्वः अन्तस्तिष्ठति अ
न्तर्गमः अन्तः पश्य एवं स्वरादय उदाहार्याः + प्रप
रानिनिर्दुस्समवानुपर्यभ्यधिप्रतिस्वाङत्यप्युपापो
पसर्गाः + प्र परा नि निर् उत् दुर् सम् वि अव अनु परि
अभि अधि प्रति सु आङ् अति अपि अप उप एते विंश
तिरुपसर्गसंज्ञा भवन्ति अव्ययाद्य प्रयोजनं उपस
र्गेरुवश्यादिषु + अन्वादयः कर्मप्रवचनीयाः + एषां
मध्यात् अन्वाद्या एकादश कर्मप्रवचनीयसंज्ञा भवति
प्रयोजनं कर्मप्रवचनीयेभ्यस्त्यादिषु एककार्ये विकार्या
दिः + परिभाषेयम् परस्य कार्ये कर्त्तव्ये आदिरेव वर्णो
विकारी भवति नान्त्यस्तिपरिभाष्यते आसीनः + पूर्वका
र्येऽन्त्य इष्यते + पूर्वस्य कार्ये कर्त्तव्ये अन्त्यो वर्णो विकारी
इष्यते + सः यः + क्वचित्पूर्वपरयोः सर्वौ + क्वचित्पूर्वपरौ
सर्वौ विकारिणौ भवतः इतः इह + संसार्ये योगसाय
नम् + योगस्य सूत्रवाक्यस्य साधनं पूरणं षट्पादेय
नदन्यसूत्रेभ्यः संसार्यमनुवर्त्तनीयं यथाजसीन्यस्ययोग
स्य पूरणं अकारो दीर्घमिति पूर्वसूत्रात्संसार्यते इति।

लघुहंसोसन्धिप्रकरणेविधानपादःषष्ठः ६

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri